ताम्रवल्ली चित्रपर्णी कान्तारी रक्तयष्टिका ॥”
इति रत्नमाला ॥)

अस्या गुणाः । मधुरत्वम् । कषायत्वम् । उष्णत्वम् । गुरुत्वम् । व्रणमेहज्वरश्लेष्मविषनेत्रामयनाशित्वञ्च । सा चतुर्व्विधा । चोलः१ योजनी२ कौन्ती ३ सिंहली च ४ । इति राजनिर्घण्टः ॥ कुष्ठस्वरभङ्गशोधनाशित्वम् । वर्ण्यकारित्वञ्च । इति राजवल्लभः ॥ अपि च ।

“मञ्जिष्ठा मधुरा तिक्ता कषाया स्वर्य्यवर्णकृत् ।
गुरूष्णा विषश्लेष्मघ्नी शोथयोन्यक्षिकर्णरुक् ।
रक्तातिसारकुष्ठास्रविसर्पव्रणमेहनुत् ॥”
इति भावप्रकाशः ॥

मञ्जी, स्त्री, (मञ्जयति दीप्यते इति । मञ्जि + इन् । कृदिकारादिति ङीष् ।) मञ्जरी । इति हेमचन्द्रः त्रिकाण्डशेषश्च ॥

मञ्जीरः, पुं, क्ली, (मञ्जति मधुरं शब्दायते । इति मन्ज् ध्वनौ सौत्रधातुः + बाहुलकात् ईरन् ।) नूपुरः । इत्यमरः । २ । ६ । १०९ ॥ मञ्जीरोऽस्त्री स नूपुरः । इति रभसः ॥ (यथा, गीतगोविन्दे । ५ । ११ ।

“मुखरमधीरं त्यज मञ्जीरं
रिपुमिव केलिषु लोलम् ॥”)

मञ्जीरः, पुं, (मञ्ज + ईरन् ।) मन्थानदण्डरज्जुबन्धनार्थस्तम्भः । तत्पर्य्यायः । विष्कम्भः २ कुटरः ३ । इति हेमचन्द्रः ॥

मञ्जु, त्रि, (मञ्जतीति । मञ्ज ध्वनौ सौत्रधातुः । “भृमृशीङ्तॄचरित्सरितनिधनिमिमस्जिभ्य उः ।” उणा० । १ । ७ । इति कुः ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥ (यथा, पद्याङ्कदूते । १ ।

“त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम ॥”)

मञ्जुकेशी, [न्] पुं, (मञ्जवो मनोहराः केशाः सन्त्यस्य । इनि ।) श्रीकृष्णः । इति हलायुधः ॥ सुन्दरकेशविशिष्टे त्रि ॥

मञ्जुगमना, स्त्री, (मञ्जु मनोहरं गमनं यस्याः । स्त्रियां टाप् ।) हंसी । इति राजनिर्घण्टः ॥ सुन्दरगामिनि त्रि ॥

मञ्जुघोषः, पुं, (मञ्जुर्मनोहरो घोषः शब्दोऽस्य ।) पूर्व्वजिनभेदः । इति त्रिकाण्डशेषः ॥ उपास्यदेवताविशेषः । अस्य मन्त्रादि यथा,—

“जाड्यौघतिमिरध्वंसी संसारार्णवतारकः ।
श्रीमञ्जुघोषो जयतां साधकानां सुखावहः ॥”

तन्त्रागमोत्तरे ।

“मातृकादि समुद्धृत्य वह्निबीजं समुद्धरेत् ।
वामांसं कूर्म्मसंज्ञञ्च ततो मेषिं समुद्धरेत् ॥
मीनेशञ्च ततः कुर्य्यात् वामनेत्रेन्दुसंयुतम् ।
षडक्षरो मनुः प्रोक्तो मञ्जुघोषस्य शम्भुना ॥
इयन्तु दीपनी प्रोक्ता फलमन्यत्तु कथ्यते ।
अङ्कुशं शक्तिबीजञ्च रमाबीजं ततः प्रिये ! ॥
बीजत्रयात्मको मन्त्रो जाड्यौघध्वान्तनाशनः ।
शक्तिबीजं रमाबीज कामबीजं तथा प्रिये ! ॥
विद्या श्रुतिधरी प्रोक्ता एषा वर्णत्रयात्मिका ।
हकारो वह्निमारूढो वामनेत्रेन्दुभूषितः ।
प्रोक्ता सार्व्वज्ञविद्येयं एकवर्णात्मिका प्रिये ! ॥
सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुश्च वा ।
तदा मन्त्रो भवेद्धन्त्या शुभदो बुद्धिदो भवेत् ॥
मध्याह्ने सलिले चैव भोजने भाजने तथा ।
गोमये तु वह्निर्द्देशे मैथुने रमणीकुचे ॥
गोष्ठे च त्रिशि गोमुखे यन्त्रं डमरुसन्निभम् ।
विलिख्य मन्त्रवर्णांश्च त्रिश ऊर्द्धे अधस्तथा ।
लिखेच्चन्दनलेखन्या प्रयत्नात् साधकोत्तमः ।
उच्चाटने लिखेद्यन्त्रं गोचर्म्मणि विशेषतः ।
सलिले विजयी नित्यं भजने च महेश्वरः ॥
गोमये वावदूकः स्यान्गोष्ठे सर्व्वज्ञतां व्रजेत् ।
कुचे श्रुतिधरो नित्यं गोमुखे च महाकविः ॥
गोमत्रं वदरीमूलं चन्दनं पांशुमेव च ।
एकीकृत्याष्टधा जप्त्वा तिलकं धारयेत् सदा ॥
नमस्कृत्य वरं श्रेष्ठं प्रार्थयेद्भक्तितत्परः ।
वरं प्राप्य च तस्मादै विहरेत्तु यथासुखम् ॥
नान्यदेवार्च्चनं स्नानं प्रणवोच्चारणं न तु ।
वस्त्राञ्चलेन दन्तानां शोधनं लवणेन वा ॥
रात्रिवासो न सुस्वेत न शुचिः स्यात् कदाचन ।
एवं कृत्वा प्रयत्नेन ज्ञाता गुरुमुखात् सुधीः ॥
मासैकेन कवीन्द्रः स्यात् द्विमासेनैव ईश्वरः ।
त्रिभिर्म्मासैर्भवेन्मर्त्यः सर्व्वशास्त्रविशारदः ॥
पुत्त्रार्थी लभते पुत्त्रं धनार्थी विपुलं धनम् ।
आयुरारोग्यकामस्तु सर्व्वान् कामानवाप्नुयात् ॥

ततः कराङ्गन्यासौ ।

ह्रां ह्रीं अङ्गुष्ठाभ्यां नमः । इत्यादि एवं हृदयादिषु । तथा च तन्त्रे ।

“सबर्गको वकेशश्च द्वौ वर्णौ कथितौ प्रिये ! ।
षड्दीर्घभाग्भ्यामेताभ्यां षडङ्गानि समाचरेत् ॥
सबर्गः चकारः वकेशः शकारः ॥*॥ ध्यानम् ।

“शशधरमिव शुभ्रं खड्गपुस्ताङ्कपाणिं
सुरुचिरमतिशान्तं पञ्चचूड़ं कुमारम् ।
पृथुतरवरमुख्यं पद्मपत्रायताक्षं
कुमतिदहनदक्षं मञ्जुघोषं नमामि ॥

पीठपूजां ततः कुर्य्यादाधारादिशक्तितः ।
भूतप्रेतादिभिः कुर्य्यात् पीठासनमनन्तरम् ॥
ज्ञानदात्रे नमः पाद्यं बुद्धिकर्त्रे तथाचमम् ।
आघ्नाणशाय गन्धः स्यादर्घ्यं स्यात् यच्छाय वै ॥
सर्व्वसिद्धिप्रदायेति पुष्पं दद्याद्विचक्षणः ।
कुन्दपुष्पं समादाय भैरवान् पूजयेत्ततः ॥
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥
ततो धूपादिकं दत्त्वा शक्तिगानि विसर्ज्जयेत् ।
तैः पुष्पैः पूजयेदष्टौ यक्षिणीश्च विशेषतः ॥
सुरारिसुन्दरी चैव मनोहारिण्यनन्तरम् ।
कनकावती तथा कामेश्वरी च रतिकर्य्यथ ॥
पद्मिनी च नटी चैव अनुरागिण्यनन्तरम् ।
पूज्या एतास्तु योगिन्यो ह्रस्वलेखाबीजपूर्व्विकाः ॥
एवं संपूज्य देवेशं लक्षषट्कं जपेन्मनुम् ।
हुताक्तकुन्दपुष्पैश्च एकादशशतानि च ॥
जुहुयाद्दीपिते वह्नौ कान्तारे पितृवेश्मनि ।
एवं सिद्धमनुर्मन्त्री महायोगेश्वरी भवेत् ॥”
इति तन्त्रसारः ॥

प्रकारान्तरं कुक्कुटादितन्त्रे द्रष्टव्यम् ॥

मञ्जुपाठकः, पुं, (मञ्जु मनोहरं पठतीति पठ + ण्वुल् ।) शुकपक्षी । इति राजनिर्घण्टः ॥ सुन्दरपाठकर्त्तरि त्रि ॥

मञ्जुप्राणः, पुं, (मञ्जवः प्राणाः यस्य । सर्व्वव्यापकतया महाप्राणत्वादस्य तथात्वम् ।) ब्रह्मा । इति जटाधरः ॥

मञ्जुभद्रः, पुं, (मञ्जु मनोहरं भद्रं मङ्गलं यस्य ।) जिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुघोषः ४ कुमारः ५ अष्टारचक्रवान् ६ स्थिरचक्रः ७ वज्रधरः ८ प्रज्ञाकायः ९ वादिराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ शार्द्दूलवाहनः १४ धियाम्पतिः १५ पूर्व्वजिनः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पञ्चचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४ । इति त्रिकाण्डशेषः ॥

मञ्जुलं, क्ली, (मञ्जु मञ्जुलमस्त्यस्येति । “सिध्मादिभ्यश्च ।” ५ । २ । ९७ । इति मञ्जुशब्दात् लच् ।) जलाश्चलम् । निकुञ्जम् । इति मेदिनी । ले, ९ । २२ । ॥ शैवलः । इति विश्वः ॥

मञ्जुलः, पुं, (मञ्जु मञ्जुलमस्यास्तीति । मञ्जु + सिध्मादित्वात् लच् ।) जलरङ्कपक्षी । इति मेदिनी । १ । २२ ॥ सुन्दरे त्रि । इत्यमरः । ३ । १ । ५२ ॥ (यथा, कालिकापुराणे ४५अध्याये ।

“मञ्जुलं यौवनोद्भिदं प्राप श्रीरिव माधवे ।”

नदीभेदे स्त्री । यथा, महाभारते । ६ । ९ । ३४ ।

“चित्रोपलां चित्ररथां मञ्जुलां वाहिनीं तथा ॥”)

मञ्जुश्रीः, पुं, (मञ्जुर्मनोहरा श्रीः शोभा यस्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

मञ्जुषा, स्त्री, (मञ्जूषा । पृषोदरादित्वात् ह्रस्वः ।) मञ्जूषा । पेट्रा इति भाषा । यथा,—

“मञ्जुषापि च मञ्जूषा पेटा च पेटिकेत्यपि ।”
इति शब्दरत्नावली ॥

मञ्जूषा, स्त्री, (मज्जन्ति द्रव्यमस्मिन् । “मसेर्नुम् च ।” उणा० ।४।७७ । इति मस्ज + ऊषन् । नुम् च स चान्त्योऽन्त्यात् परः । ततो जश्त्वचुत्वे मध्यमस्य लोपात् साधुः ।) पिटकः । इत्यमरः ।२।१०।३०॥ (यथा, देवीभागवते । २।६।३३।

“मञ्जूषायां सुतं कुन्ती सुप्तवन्ती वाक्यमब्रवीत् ॥”) पाषाणः । इत्युणादिकोषः ॥ मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (मञ्जिष्ठार्थे पर्य्यायो यथा,—

“मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मट, सादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) सौत्रधातुरयम् । अस्य प्रयोगः । मटद्यः । इति दुर्गादासः ॥